# मम मतं:, मम जय:



चित्राङ्कनम्

अदम्य शर्मा, आशीष चौहान, सौविक डे, हर्ष कुमार

**कथाः कथयन्ति.....!**

कथाः जीवनेन सम्बद्धानाम् अम्लमिष्ठानुभवानां जीवनयापनस्य मनोबलस्य तथा तादृशानां विषयाणां सन्दर्भे सहजतया सूचनाः प्रयच्छन्ति, यासाम् अभिज्ञानं बोधश्च अत्यन्तमावश्यकं वर्तते। अङ्ककीयं जगत्,नारीणां विषये विमर्शः, अथवा प्रकृतेः संरक्षणं भवतु, अथवा आजीविकायाः साधनानि, जीवनस्य आह्वानानां प्रत्यक्षीकरणं समाधानं मतदानस्य अधिकारो वा भवतु – एते सर्वेऽपि विषयाः उत्कृष्टतया जीवनयापने सहायतां कुर्वन्ति। 'महत्त्वपूर्णानां जीवनकौशलानां' विभिन्नान् विषयान् उद्दिश्य लिखितानां कथानां पठनानन्देन सहैव अवबोधात्मकस्य, तार्किकस्य, विश्लेषणात्मकस्य तथा च उचित-निर्णयस्य कौशलद्वाराणि अपि उद्घाटयन्ति। पठ्यताम्, अवगम्यताम्, अभिवर्ध्यताम्!

**कार्यक्रम-समन्वयिका:** प्रो. उषा शर्मा, आचार्या एवं प्रभारिणी, राष्ट्रीय-साक्षरता-केन्द्र-प्रकोष्ठः, रा.शै.अ.प्र.प. नवदेहली

**अनुवादः** डॉ. मनमोहन शर्मा

**चित्राङ्कनम्:** अदम्य शर्मा, आशीष चौहान, सौविक डे, हर्ष कुमार

**मुद्रणकला:** डॉ. ऋषिका शर्मा, सहायकाचार्यः, एनीमेशन एवं मल्टीमीडिया विभागः, बीआईटी, जयपुरम्

**प्रारूप-निर्माणम्:** मोहम्मद नाज़िम

**समीक्षा-समितिः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली:** लक्ष्मीनरसिंहन्, कार्याधिकारी**;** प्रदीप पौडेल, वरिष्ठशोधाध्येता; विष्णु प्रसाद उपाध्याय, वरिष्ठशोधाध्येता; गानमूर्ति, वरिष्ठशोधाध्येता

**मार्गदर्शनम्:** प्रो. नीना सबनानी, एनिमेटर एवं सहायक-संकायः, डिज़ाइन-विभागः, भारतीय-प्रौद्योगिकी-संस्थानम्, हैदराबादम्**;** चमूकृष्णशास्त्री, अध्यक्षः, भारतीयभाषासमितिः, नवदेहली**;** प्रो. चाँदकिरण सलूजा, निदेशकः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

**कृतज्ञता-ज्ञापनम्**

श्याम सिंह सुशील, लेखकः

अक्षय कुमार दीक्षित, मेंटर, शिक्षा-निदेशालयः, प्रशासनम्, देहली

डॉ. विभूति पंड्या, विभाग-प्रमुखः एवं सहायकाचार्यः, एनीमेशन एवं मल्टीमीडिया विभागः, बीआईटी, जयपुरम्

गौतम गोस्वामी, सहायकाचार्यः, एनीमेशन एवं मल्टीमीडिया विभागः, बीआईटी, जयपुरम्

मोहम्मद शाह आलम, वरिष्ठः परामर्शदाता (आईसीटी), राष्ट्रिय-साक्षरता-केन्द्र-प्रकोष्ठः, एनसीईआरटी, नवदेहली

भावना खेड़ा, जेपीएफ, राष्ट्रिय-साक्षरता-केन्द्र-प्रकोष्ठः, एनसीईआरटी, नवदेहली

# मम मतं:,





# मम जय:

**चित्राङ्कनम्**

अदम्य शर्मा, आशीष चौहान, सौविक डे, हर्ष कुमार

राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING


अद्य अनिलस्य विद्यालये बाह्यतः केचन जनाः आगताः आसन्। ते मतदातृ-सहायक-केन्द्रात् आगताः इति अभिज्ञातम्। ते सर्वान् शिक्षकान्, अन्यान् कर्मचारिणः विशेषतः द्वादशकक्ष्यायाः छात्रान् च मतदान-विषये प्रबोधयितुम् आगताः आसन्।
ये अष्टादश-वर्षीयाः अभवन्, मतदातृ-सूचौ तेषां नाम्नां लेखनस्य कार्यम् अपि क्रियमाणम् आसीत्। अस्मिन् वर्षे अनिलः अपि अष्टादशवर्षीयः सञ्जातः। मतदानं कर्तुम् अयं तस्य प्रथमः अवसरः आसीत्।
देशस्य प्रगतौ, तस्य वृद्धौ विकासे च सहभागं वोढुं मतदानं महत्त्वपूर्णं माध्यमम् अस्ति। यदि भवन्तः १८ वर्षीयाः सन्ति तर्हि मतदातृ-सूचौ स्वनाम्नः पञ्जीकरणम् अवश्यं कुर्वन्तु। तथा अग्रे जायमानेषु निर्वाचनेषु मतदानम् अवश्यं कुर्वन्तु।



मतदानस्य विषये ज्ञात्वा अनिलः निश्चयं कृतवान् यत् सः अवश्यमेव मतदानं करिष्यति इति । कतिपयेभ्यः दिनेभ्यः अनन्तरं निर्वाचनदिवसः अपि आगतः । अनिलस्य स्वक्षेत्रस्य विद्यालये एव मतदानकेन्द्रं निर्मितम् आसीत् ।




सः प्रातःकाले एव विद्यालयं प्राप्तवान्। परन्तु अद्य तत्र सर्वं परिवर्तितम् आसीत्।
अत्यधिकसुरक्षया सह आरक्षकाः प्रत्येकं जनस्य अभिज्ञानं कुर्वन्तः आसन्। अन्यस्मिन् पक्षे केचन जनाः उत्पीठिकाः संस्थाप्य आसन्दीषु उपविश्य मतदानार्थम् आगतानां जनानां साहाय्यं कुर्वन्तः आसन्।
यदा अनिलः अन्तः गच्छन् आसीत् तदानीम् एव कश्चन आरक्षकः तम् अवरुद्धवान्।


तिष्ठ, कृपया स्वस्य परिचयपत्रं दर्शयतु।
परिचयपत्रम् ! अहं परिचयपत्रं तु न आनीतवान्।
तर्हि भवान् अन्तः प्रवेष्टुं न अर्हति।
परन्तु एषः मम एव विद्यालयः, अत्र सर्वेऽपि मां जानन्ति। परिचयपत्रस्य का आवश्यकता ?
अनिलः बहु प्रयत्तवान् परन्तु परिचयपत्रं विना तस्य अन्तः प्रवेशः न जातः।


किम् अभवत् ? किम् अहं भवतः साहाय्यं करोमि ?
भवती का ?
मम नाम हिना। अहं निर्वाचन-साक्षरता-स्वयंसेविका अस्मि।
पश्य भोः! अहं प्रथमवारं मतदानार्थम् आगतः परन्तु एते आरक्षकाः मम अन्तः प्रवेशम् एव अवरुन्धन्ति। ते वदन्ति यत् भवतः परिचयपत्रं दर्शयतु। यदि मतदातृसूचौ मम नाम स्पष्टतया लिखितम् अस्ति तर्हि मम परिचयपत्रस्य का आवश्यकता वर्तते ?


शृणोतु, मतदानार्थं सूचौ नाम्ना सहैव मतदातुः पार्श्वे सर्वकारेण अनुमोदितं  सचित्र-परिचयपत्रं परिचयपत्रं वा भवेत् ।
परन्तु कतमं परिचयपत्रम् आवश्यकम् ? किमर्थं च ?
भारत सरकार
GOVERNMENT OF INDIA
Name XXXX
DOB: XX-XX-XXXX
Gender: MALE
0000 1111 2222
आधार - आम आदमी का अधिकार
मतदानं कुर्वन् आधार-पत्रकम् (कार्ड), चालनानुज्ञापत्रम् (ड्राइविंग लाइसेंस), मतदातुः परिचय-पत्रम् इत्यादिषु किमपि एकं परिचय-पत्रं महत्त्वपूर्णम् अस्ति ।
एतत् अत्यन्तम् आवश्यकं येन कश्चिदपि जनः अन्यस्य मतदातुः नाम्ना मतदानं न कुर्यात् ।


पश्य एतत् , सर्वकारेण अनुमोदितानां वैध-परिचयपत्राणाम् इमां सूचीम् ।
LOK SABHA ELECTIONS-2019
(RAJASTHAN)
First Phase - 29th April 2019
Second Phase - 06th May 2019
#GoCall 1950
मतदान केन्द्र पर मतदाता फोटो पर्ची (voter slip) का उपयोग सुविधा के लिए किया जाएगा लेकिन यह पहचान पत्र के रूप में मान्य नहीं होगी। मतदाताओं से अनुरोध है कि वह अपना मतदाता फोटो पहचान पत्र या निम्न उल्लेखित 11 दस्तावेजों में से कोई भी एक दस्तावेज अपने साथ अवश्य लाएं:-
आधार कार्ड
मनरेगा जॉब कार्ड
पास बुक (जिसे बैंक/पोस्ट ऑफिस द्वारा फोटो सहित जारी किया गया हो)
ड्राइविंग लाइसेंस
सेवा पहचान पत्र (जिसे केंद्र/राज्य सरकार/पीएसयू/ पब्लिक लिमिटेड कंपनी द्वारा अपने कर्मचारियों को जारी किया गया हो)
पैन कार्ड
पासपोर्ट
पेंशन दस्तावेज (फोटो सहित)
स्मार्ट कार्ड (एनपीआर के अंतर्गत आरजीआई द्वारा जारी)
स्वास्थ्य बीमा स्मार्ट कार्ड (श्रम मंत्रालय द्वारा जारी)
अधिकारिक पहचान पत्र (एमपी/एमएलए/एमएलसी को जारी)
किम्, एतेषु परिचयपत्रेषु किञ्चिदपि परिचय-पत्रं भवतः पार्श्वे अस्ति ?







अनिलः गृहात् स्वस्य आधारपत्रम् आनयत्, पूर्णविश्वासेन मतदानार्थं विद्यालयस्य अन्तः प्राविशत्।




अनिलः स्वस्य आधार-पत्रं प्रदर्शितवान्।
एकः मतदानकेन्द्रस्य अधिकारी तस्य अङ्गुलीं मसीद्वारा चिह्नितवान्।
ततः सः ईवीएम्-यन्त्रस्य पिञ्जं नुत्वा प्रथमं मतदानं कृतवान्।
देशस्य विकास-क्रमे लघुरेव परन्तु महत्त्वपूर्णः भागः भूत्वा सः गौरवान्वितः आसीत्।

सा विद्या या विमुक्तये

**CELL FOR NATIONAL CENTRE FOR LITERACY**

**राष्ट्रीय साक्षरता केंद्र–प्रकोष्ठ**












































## DIKSHA (Education for All Vertical) :

## https://diksha.gov.in/adult-education.html

## CNCL Website :

## https://ncert.nic.in/cncl/

महत्वपूर्णजीवनकोकौसले आश्रिता

# कथा श्रृंखला










































राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING